**किलकिञ्चित** न० किल अलीकेन ईषत् चितं रचितम्। "स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम्। साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात्" सा० दर्पणोक्ते स्त्रीणां भावभेदे यथा "पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः। कामिनस्स्म कुरुते करभोरूर्हारि शुष्करुदितञ्च सुखेऽपि" माघः "त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल" नैष०।

**किलकिला** स्त्री किल–क्त प्रकारे द्वित्वम् टाप्। १हर्षध्वनौ त्रिका०। "ततः किलकिलाशब्दस्तस्मिन् वदति पार्थिवे" भा०आ०६१अ। "जितशात्रवदर्पस्य प्रतिज्ञापूरणीकृतः। वीरस्य गर्जितं सिंहनादः किलकिला तथा" इत्युक्ते वीरस्य २सिंहनादे च विश्वः

**किलाट** पु० "नष्टदुग्धस्य पक्कस्य पिण्डं प्रोक्तः किलाटकः" इति भावप्र० परिभाषिते विस्रथितदुग्धस्य पाकेन घनीभूते पिण्डाकारे पदार्थे। तद्गुणाद्युक्तं तत्रैव यथा "पेयूषश्च किलाटश्च क्षीरशाकं तथैव च। तक्रपिण्ड इमे वृष्या बृंहणा बलवर्द्धनाः। गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः। दीप्ताग्नौ च विनिद्राणां विद्रधौ चातिपूजिताम्। गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः"। ततः स्वार्थे क। किलाटक तत्रार्थे। कूर्चिकायां क्षीरविकारभेदे स्त्री हेमच० गौरा० ङीष्। [हृद्योहारा०।

**किलाटिन्** पुं किलति किल–क, अट–णिनि कर्म्म०। वंश

**किलात** पुं किल–शौक्ल्ये क किलमतति अत–अण्। ऋषिभेदे तस्य गोत्रापत्यम् विदा० अञ्। कैलात तद्गोत्रापत्ये पुंस्त्री० "किलाताकुली इति हासुरब्रह्मावासतुः"। शत० ब्रा० १,१,४,१४,

**किलास** न० किल वर्णे क किलमस्यति अस+अण्। १सिध्मरोगे (छुली)तदस्यास्ति अच्। २तद्विशिष्टे त्रि० "चन्द्रमसे किलासम्" यजु० ३०,२१,। "किलासं सिध्मरोगवन्तम्" वेददी०। सिध्म च क्षुद्रकुष्ठभेदः यथाह सुश्रुतः "क्षुद्रकुष्ठमत ऊर्द्ध्वं वक्ष्याम इत्युपक्रमे "कण्डूमच्छ्वेतमपाकि सिध्म विद्यात्तनु प्रायश ऊर्द्धकाये" इति तस्य लक्षणादिकमुक्त्वा "किलासमपि कुष्ठविकल्पएव। तत्त्रिविधं वातेन पित्तेन श्लेष्मणा चेति। कुष्ठकिलासयोरन्तरन्त्वग्गतमेव किलासमपरिस्रावि च। तद्वातेन मण्डलमरुणं परुषं परिध्वंसि च; पित्तेन पद्मपत्रप्रतीकाशं सपरिदाहञ्च। श्लेष्मणापि श्वेतं स्निग्धं बहुलं कण्डूमच्च। तेषु सम्बद्धमण्डलमन्तेजातं रक्तरोम चाऽसाध्यमग्निदग्धञ्च। कुष्ठेषु रुक्त्वक्सङ्कोचस्वापस्वेदशोफभेदकौण्यस्वरोपघाता वातेन। पाकावदरणाङ्गुलिपतनकर्ण्णनासाभङ्गाक्षिरोगसत्त्वोत्पत्तयः पित्तेन। कण्डूवर्णभेदशोफास्रावगौरवाणि श्लेष्मणा"।

**किलासघ्न** पु० किलासं हन्ति हन्–टक्। (काँकरोल) ख्याते वृक्षे हेमच०।

**किलासनाशन** त्रि० किलासं नाशयति नश–णिच्–ल्यु। सिध्मरोगनाशके औषधादौ "आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम्" अथ० १,२४,२।

**किलासिन्** त्रि० किलासमस्त्यर्थे इनि।(छुली) रोगयुक्ते स्त्रियां ङीप्।

**किलिञ्ज** न० किल्यतेऽनेन किलि–इन् ततोजायते जन–ड पृषो०मुम्। १वीरणादिजाते कटे २सूक्ष्मदारुणि च जटा०। त्रिका०पु०। तेन उभयलिङ्गता। स्वार्थे क। कटे काष्ठादिरज्जौ च अमरः। "तुषान् यवान् निष्पूतान् रात्रौ गोमूत्रपर्य्युषितान्" "महति किलिञ्जे शोषयेत्। आस्तीर्य्य किलिञ्जेऽन्यस्मिन् वा तत्प्रतिरूपके शयानं प्राहृत्य स्वेदयेत्" सुश्रुतः

**किलिम** न० किल–इमन्। देवदारुवृक्षे राजनि०।

**किल्विन्** पु० स्त्री किल–शौक्ल्ये भावे क्विप् ततोऽस्त्यर्थे बा० विनि। घोटके त्रिका० स्त्रियां नान्तत्वात् ङीप्।

**किल्विष** न० किल–टिषच्–वुक् च। १पापे २अपराधे च अमरः ३रोगे मेदि० तस्य पापहेतुत्वात् तथात्वम्। "न किल्विषादीषत्ते बस्त आकरः" ऋ०५,३५,४,"क्षीरं यदस्याः पीयते तद्वै पितृषु किल्विषम्, अथ०५,१९५। "अपराधे। "कोमे लुब्धक! दोषोऽत्र विद्यते यदि बालिश!। अस्वतन्त्रं च मां मृत्युर्विवशं यदचूचुदत्। तस्यैव वचनाद्दृष्टो न कोपेन न काम्यया। तस्य तत् किल्विषं लुब्ध! विद्यते यदि किल्विषम्" इति लुब्धकं प्रति सर्पोक्तिः। पापे "यद्यन्यवशगेनेदं कृतं तु पन्नगाशुभम्। कारणं वै त्वमप्यत्र तस्मात्त्वमपि किल्विषी" सर्पं प्रति लुब्धकोक्तिः भा० आनु०१अ०। तत्र पूर्ववाक्ये दोषत्वेन कीर्त्तनात् अपकारपरत्वम्। उत्तरत्र अशुभत्वेन कीर्त्तनात् पापपरत्वम्। "एवं सति न दोषो मे नास्ति बध्यो न किल्विषी। किल्विषं समवाये स्यात् मन्यसे यदि किल्विषम्" तत्रैव। कीर्त्तिभेदके कायिके ४पापे च। "अघायस्य किल्विषम्" यजु० ३५,११, "किल्विषं कीर्त्तिभेदकं कायिकं पापम्" वेददी०। ततः अस्त्यर्थे इनि। किल्विषिन्।तद्युक्ते त्रि०।

**किश(स)र** पुंन०किम्+स्ट–(शृ)-अच् पृषो०। सुगन्धद्रव्यभेदे।